# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्
# सत्रान्तपरीक्षा- एप्रिल,२०१९

**कक्षा - शास्त्री-३** (SEM-6) **प्रश्नपत्रम्** – ५ **गुणाः - ७०**

**विषयः सर्वदर्शनम्** **(CC – 3.6.11)** **समयः** – ११:०० तः २:००

**दिनाङ्कः : ०३/०४/२०१९** **(ग्रन्थः – जैमिनीयन्यायमाला प्रथमाध्यास्य १-२ पादौ)**

---

**विभागः-१**

**प्रश्नः-१** निम्नलिखितेषु द्वयोः व्याख्यां कारिकाभिः लिखत। (१०)

(१) युक्तिं मानवतीमिति मङ्गलश्लोकं स्पष्टं विवृणुत।

(२) मीमांसादर्शनप्रतिपाद्यासाधारणविषयं प्रदर्शयत।

(३) ग्रन्थलेखनसङ्गतिं ग्रन्थकर्तुर्वैशिष्ट्यं च व्याख्यात।

**प्रश्नः-२** निम्नलिखितयोः एकस्य व्याख्यां विशदतया लिखन्तु। (१०)

**(१)** न्यायमालायाग्रन्थस्य उपोद्घातं सङ्क्षेपेण श्लोकैः व्याख्यात।

**(२)** विचारशास्त्रमिदम् आरभ्यमनारभ्यमिति भाट्टमतं सश्लोकं व्याख्यात।

**विभागः-२**

**प्रश्नः-३** निम्नलिखितेषु द्वयोः व्याख्यां विवृणुत। (१०)

(१) वेदस्यापौरुषेयत्वं पूर्वपक्षसहितं व्याख्यात।

(२) जिज्ञासाधिकरणे गुरुमतं व्याख्यात।

(३) शब्दानां नित्यत्वं यथाग्रन्थम् उपस्थापयत।

**प्रश्नः-४** निम्नलिखितयोः एकस्य व्याख्यां विशदतया लिखतु। (१०)

(१) धर्मप्रमाणपरीक्षणं सश्लोकं यथाग्रन्थं प्रतिपादयत।

(२) लौकिकाकारहीनस्य लक्षणव्युत्पत्तयः न भवन्तीति प्रतिपाद्य भाट्टमतेन वारयत।

**विभागः-३**

**प्रश्नः-५** निम्नलिखितेषु द्वयोः व्याख्यां विवृणुत। (१०)

(१) पुरुषार्थं प्रति विधेः प्रामुख्यं व्याख्यात।

(२) मन्त्राधिकरणं यथाग्रन्थं व्याख्यात।

(३) वाक्यार्थज्ञाने सङ्गतेः अपेक्षां व्याख्यात ।

**प्रश्नः-६** निम्नलिखितयोः द्वयोः एकस्य व्याख्यां विशदतया लिखतु। (१०)

(१) 'वायुर्वा' इत्यादेः अर्थवादत्वं यथाग्रन्थं व्याख्यात।

(२) विधेः परिचयं यथाग्रन्थं यच्छत।

**प्रश्नः-७** निम्नलिखितप्रश्नेषु दशप्रश्नानाम् अतिलघूत्तराणि लिखन्तु। (१०)

१. विचारविषयः कः?
२. पञ्चमूर्तिप्रथा का?
३. एकैकस्मिन् अधिकरणे कति अवयवाः सन्ति?
४. "स्वाध्यायोऽध्येतव्यः" इति किम्?
५. गुरुमते विचारशास्त्रस्यारम्भो भवति न वा?
६. गामानयेत्यत्र सङ्गतिग्रहणं कथम्?
७. वाक्यं कथं प्रतिपद्यते?
८. क्षिप्रगामिदेवता का?
९. जैमिनीयन्यायमाला कति श्लोकान्नातिक्रामति?
१०. वेदापौरुषेयवादिनः के?
११. स्फोटनामकः पदार्थः कैरङ्गीक्रियते?
१२. कः धर्मः?
१३. माधवाचार्यः कस्य मन्त्री आसीत्?
१४. क्रीडापुष्करिणीसमा का?
१५. न्यायसङ्गतिः कतिविधा? काः च ताः ?

* * * * * * * * * * *

# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्
# सत्रान्तपरीक्षा- अप्रिल्,२०१९

**कक्षा:- शास्त्री-३** (SEM-**6**) **प्रश्नपत्रम् -५** **गुणाः - ७०**
**विषयः: सर्वदर्शनम्** **(CC - 3.6.11 )** **समयः -**
**दिनाङ्कः :**
**(ग्रन्थः –जैमिनीयन्यायमाला)**

---

## प्रश्नः-७

१. धर्मः।
२. ईशानतत्पुरुषाघोरवामदेवसद्योजातलक्षणानि पञ्चमूर्तिप्रथेति कथ्यते।
३. पञ्चावयवाः, ते विषयः,संशयः,सङ्गतिः,पूर्वपक्षः,सिद्धान्तश्चेति।
४. विधिः।
५. भवति।
६. गवानयनरूपां मध्यमवृद्धप्रवृत्तिमवलोक्य।
७. आकाङ्क्षा-योग्यता-सन्निधिवशात्।
८. वायुः।
९. सहस्रद्वयम्।
१०. मीमांसकाः।
११. वैयाकरणैः।
१२. चोदनालक्षणोऽर्थो धर्मः।
१३. श्री बुक्कणक्ष्मापतेः।
१४. मीमांसान्यायमाला।
१५. त्रिधा, शास्त्राध्ययनपादसङ्गतयः।